# Auravashaunakakrita Shri Ganesha Stuti

# ઔરવશૌનકકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Auravashaunakakrita Shri Ganesha Stuti

File name : gaNeshastutiHauravashaunakakRRitA.itx

Category : ganesha, gaNeshapurANa, stuti

Location : doc_ganesha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM krIDA (uttara)khaNDaH | adhyAyaH 35 | 2.35 4-11||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# ઔરવશૌનકકૃતા શ્રીગણેશસ્તુતિઃ

તાવૂચતુઃ ।
વિશ્વસ્ય બીજં પરમસ્ય પાતા નાનાવિધાનન્દકરઃ સ્વકાનામ્ ।
નિજાર્ચનેનાદૃતચેતસાં ત્વં વિઘ્નપ્રહર્તા ગુરુકાર્યકર્તા ॥ ૪॥

પરાત્પરસ્ત્વં પરમાર્થભૂતો વેદાન્તવેદ્યો હૃદયેતિગુપ્તઃ ।
સર્વશ્રુતીનાં ચન ગોચરોઽસિ નમાવ ઇત્થં નિજદૈવતં ત્વામ્ ॥ ૫॥

ન પદ્મયોનિર્ન હરો હરિશ્ચ હરિઃ ષડાસ્યો ન સહસ્રમૂર્દ્ધા ।
માયાવિનસ્તે ન વિદુઃ સ્વરૂપં કથં નુ શક્યં પરિનિશ્ચિતું તત્ ॥ ૬॥

તવાનુકમ્પા મહતી યદા સ્યાદ્ વિભુઞ્જતઃ કર્મ શુભાશુભં સ્વમ્ ।
કાયેન વાચા મનસા નમેત્ ત્વાં જીવઁશ્ચ મુક્તો નર ઉચ્યતે સઃ ॥ ૭॥

ત્વં ભાવતુષ્ટો વિદધાસિ કામાન્ નાનાવિધાકારતયાઽખિલાનામ્ ।
સંસૃત્યકૂપારવિમુક્તિહેતુરતો વિભું ત્વાં શરણં પ્રપદ્યે ॥ ૮॥

ફલશ્રુતિઃ -
ગણેશ ઉવાચ ।
તુષ્ટોઽહં પરયા ભક્ત્યા તપસા પરમેણ ચ ।
અનયા પરયા સ્તુત્યા બ્રાહ્મણૌ ! વૃણુતં વરાન્ ॥ ૯॥

કુજન્મનાશકમિદં મમ સ્તોત્રં પઠેત્ તુ યઃ ।
ત્રિસન્ધ્યં ચ ત્રિવારં ચસર્વાન્ કામાનવાપ્નુયાત્ ॥ ૧૦॥

ષણ્માસાજ્જાયતે વિદ્યા લક્ષ્મીર્નિત્યજપાદપિ ।
પઞ્ચવારજપાન્મર્ત્ય આયુરારોગ્યમાપ્નુયાત્ ॥ ૧૧॥

ઇતિ ઔરવશૌનકકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીગણેશપુરાણં ક્રીડા (ઉત્તર)ખણ્ડઃ । અધ્યાયઃ ૩૫ । ૨.૩૫ ૪-૧૧॥

- .. shrIgaNeshapurANaM krIDA (uttara)khaNDaH . adhyAyaH 35 . 2.35 4-11..

Proofread by Preeti Bhandare

*Auravashaunakakrita Shri Ganesha Stuti*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*